# पुराणविवरणम्

Dr POLA UMAMAHESWARA RAO
LECTURER IN SANSKRIT
Dr V.S.K.G.D.COLLEGE (A)
umamahesh.pola@gmail.com
VISAKHAPATNAM-530013.

भारतीयवाङ्मये पुराणानां उत्कृष्टं स्थानमस्ति। पारंपरितदृष्ट्या चारित्रिकदृष्ट्या च पुराणेभ्य: दिव्यं वस्तु च भारतीयवाङ्मये अन्यत्नास्ति ।

" इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् "
इति प्रमाणवाक्येन ज्ञायते यत् वेदज्ञानमवगन्तुं पुराणपठन कर्तव्यमेव इति ।

**पुराणशब्दविवरणम् :-** व्याकरणदृष्ट्यापुराणशब्दस्य व्युत्पत्तिः "पुरा भवं" इति पुराणं अत्यन्तप्राचीन ग्रन्थः इत्यस्ति I प्राचीनकाले यत् अभवत् तत् पुराणमिति वदन्ति । यास्काचार्योऽपि अस्य पदस्यअर्थं पुराइत्यस्य अव्ययस्य' अन ''धातो:' पुराणमिति' भवतीति विवरणं कृतम् I
" पुरा अणति इदं सर्वं यत् " तत् पुराणमिति शब्दार्थकादण्धातोः पुराणशब्दव्युत्पत्तिः प्रदर्शिता, तथा

" यस्मात् पुरा ह्यनन्तीदं पुराणं तेन उच्यते " ब्र.पु.उं-भा-350 पा4154

पुरा अतिपूर्वकाले इदं जगत् अणन्ति भवतीत्यर्थ:I यथा कथंचिदप्यस्तु अतिपुरातनं यद् वस्तु तत् पुराणशब्दवाच्यमित्यत्र न कस्यापि विवादः I कोशकारोयऽममरसिंहोप्याह ----

" पुराणे प्रतनप्रत्नपुरातन चिरन्तनाः " इति
अति प्राचीनार्थक एवायं पुराणशब्दो विशेषणतया तत्र तत्र व्यवह्रियते,

पुराण: कूपः, पुराणं नगरं, पुराणं काव्यं,पुराण: पन्थाः, पुराणीराजधानीत्यादौ। इह तु विद्याप्रकरणे प्रयुज्यमानोऽयं शब्दोऽतिपुरातनीं विद्यामभिदधाति। सर्वत्र एवं व्यवह्रियते यत् प्राचीना विद्या पुराणविद्या भवतीति याज्ञवल्क्येनैवमुक्तम् I
" पुराणानां सर्वविद्यासु प्राथान्यम्" इति । या.स्मृ अं –श्लो-3

अत एव भगवतायाज्ञवल्क्येन विद्यागणना प्रसङ्गे सर्वासु विद्यासु पुराणस्य प्राथम्यं उदीरितम्।

" पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः।
वेदा: स्थानानि विद्यानां धर्मस्य च चतुर्दश॥ या.स्मृ अं –श्लो-3
पुराणेषु च स्पष्टमुक्तम् ---
"प्रथमं सर्वशास्त्राणां पुराणं ब्रह्मणा स्मृतम् ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः॥" वा-पु खं 1154

किञ्च " इतिहास पुराणानि पञ्चमं वेदमीश्वरः" इति श्रीमद्भागवते बहुत्र दृश्यते।
तेन सर्वविद्यासु प्राथम्यमुपगतेयं पुराणविद्येतिस्फुटी भवति।

**पुराणलक्षणम् :-** अथास्यां पुराणविद्यायां प्राधान्येन के के विषया प्रतिपाद्यन्ते, के वा तत्र अप्राधान्येन संगृह्यन्ते इत्यादि पुराणाऽधारेणैव निरुपणीयम् । तत्र प्रायेण सर्वेषु पुराणेषु पञ्च लक्षणानि व्याख्यातानि I अतः पञ्च विषयाःप्राधान्येन पुराणविद्यायां अन्तर्भवन्तीति तात्पर्यम्। अनेकैः विधेयं लक्ष्यते विज्ञायते इति तल्लक्षणम्Iतच्च विद्यास्वरूपा न्तर्गतमिति तस्य स्वरूपं ज्ञातव्यम् भवति ।

"सर्गश्च प्रतिसर्गरच वंशोमन्वन्तराणिच।
वंश्यानुचरितं चैव पुराणं पञ्च लक्षणम् "॥ वि.पु 3 अंशे श्लो-24

लक्षणमिदं किंचित् पाठभेदेन एकरूपेण वा विष्णुपुराणे, मार्कण्डेयपुराणे, अग्निपुराणे, भविष्यपुराणे, ब्रह्मवैवर्तपुराणे,वराहपुराणे, स्कान्दपुराणे, कूर्मपुराणे, मत्स्यपुराणे, गरुडपुराणे, ब्रह्माण्डपुराणे, शिवपुराणे, देवी भगवते अन्यत्रापि च लभ्यते । सर्गोनाम सृष्टिः, जगतः उत्पत्तिः,प्रतिसर्गोनाम दृश्यमानस्याऽस्य सर्वस्यप्रलयः, वंशः उपादान भूतानां तत्त्वानां, देवादीनां, मनुष्याणां च उत्पत्तिपरंपरा , वंश्यानुचरितम् , च तत् तदवंशभवानां विषये यद्विशिष्य वक्तव्यं तद्विवरणम्Iअत्रैव तत्तन्मनुष्यवंशप्रसूतानां महर्षिणाम् राज्ञांच चरितान्यपि समाविष्टानि। " मन्वन्तरं तु सृष्ट्यादीनां कालव्यवस्थापणं " इति सामान्येन शब्दानामेषां विवरणमणि तत्र तत्र प्राप्यते। क्वचित् प्रतिसर्गपदेन " आदिसृष्टेरनन्तरंजायमाना अवान्तसृष्टिरपि व्याख्यायते, प्रलयस्तु सृष्टि प्रातिलोम्येन व्यवस्थापनीय इति तदाशयःI अत्र प्रतिसर्गपदस्थाने विसर्गपदं केचिन्निवेशयन्ति । वंश्यानुचरितस्थाने वंशानुचरितमिति बहुत्र पाठः । तत्र वंशभवानामनुचरितमिति मध्यमपदलोपी समास आश्रयणीयः, वंशे भवानां चरितं वंशे एव समारोप्यं वा इति व्याख्येयम्, इति पुराणस्य पञ्चलक्षणम् ।

पद्मपुराणे तावत् --
" पुरा परंपरा वक्ति पुराणं तव वैस्मृतम् " इति प.पु 1-2-58

दृश्यते, यद्यपि पुरातनः ग्रन्थःसर्वोऽपि प्रामाणिकः न, परन्तु पुराण शब्दः रूढ्यर्थः तावत् विख्यातानि अष्टादश पुराणानि बोधयति ।तस्मात् पुराणमित्युक्ते अष्टादशमहापुराणानि संगृहयन्ते ।

## अष्टादशपुराणानि:-

" मद्वयंभद्वयं चैव ब्रत्रयं वचतुष्टयम्।
अनापक्रूस्कलिंगानि पुराणानि प्रचक्षते।।
भगवान् व्यासमहर्षिःएषा पुराणानां कर्ता इति बुधाः निश्चयं कृतवन्तः।
" ब्राह्मं दशसहस्राणि पाद्मं पञ्चोनषष्टि चा
श्री वैष्णवं त्रयोविंशच्चतुर्विंशति शैवकम् ॥ "श्री भ12-13-4
दशाशत
श्री भगवतं नारद पंचविशतिः । मार्कण्ड नव वाहन च दशपंच चतुरशतम् ॥

"दशाष्टौ श्री भागवतं नारदं पञ्चविंशतिः।
मार्कण्डं नव वाहनं च दशपञ्च चतुश्शतम् "IIश्री.भा.12-13-5

"चतुर्दश भविष्यंस्यात्तथा पंचशतानिचा।
दशाष्टौ ब्रह्मवैवर्तं लैङ्गंका लैङ्गंकादशैव तु॥ श्री.भा. 12-13-6

" चतुर्विंशति वाराहमेकाशीतिसहस्रकम् ।
स्कान्दं शतं तथाचैकं वामनं दशकीर्तितम्॥ श्री.भा. 12-13-7

" कौर्मं सप्तदशाख्यातं मात्स्यं तत्तुचतुर्दश।
एकोनविंशत् सौपर्णंब्रह्माण्डं द्वादशैवतु॥ श्री.भा. 12-13-8

एवं पुराणसन्दोहश्चतुर्लक्ष उदाहृतः।
तत्राष्टादशसाहस्र श्री भागवतमिष्यते॥ श्री.भा. 12-13-9

ब्रहमपुराणे दशसहस्रश्लोकानि, पदमपुराणे पंचोनषष्टि सहस्रं, विष्णु पुराणे त्रयोविंशत्सहस्रं, शिवपुराणे चतुर्विंशति सहस्रं,श्रीमद् भागवतपुराणे अष्टादशसहस्रं, नारदपुराणे पंचविशतिसहस्रं, मार्कण्डेयपुराणे नवसहस्रं, अग्निपुराणे पंचदशसहस्र चतुश्शतम्, भविष्यपुराणे चतुर्दशसहस्र पंचशतम् , ब्रह्मवैवर्तपुराणे अण्टादशसहस्रं, लिंग पुराणे एका दशसहस्रं, वराहपुराणे चतुर्विंशतिसहस्रं, स्कान्दपुराणे एकाशीतिसहस्र एकशतं,वामनपुराणे दशसहस्रं, कूर्मपुराणे सप्तदशसहस्रं , मत्स्यपुराणे चतुर्दशसहस्रं, गरुड पुराणे एकोन विंशति सहस्रं, ब्रमाण्डपुराणे द्वादश सहस्रं, एवं रीत्या अण्टादशपुराणेषु चतुर्लक्षश्लोकाः सन्ति।

*****